Shri Raghunath Temple MSS. Library,
JAMMU

No. ५३८ च

Title ऋतुसंहारः

Author म. कालिदासः

Extent ८ Age सं. १९०५

Subject काव्यम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ऋतुसंहारः

५३८

८ पत्र

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ श्रीगणेशाय नमः॥ गुरुवे नमः॥ प्रचंडसूर्यः स्पृहणीयचंद्रमाः सदावगाहक्षतवारिसंचयः दिनांतर
म्योभ्युपशांतमन्मथो निदाघकालः समुपागतः प्रिये॥१॥ निशाः शशांकक्षतनीलराजयः क्वचिद्विचित्रं जल
यंत्रमंदिरं॥ मणिप्रकाराः सरसं च चंदनं शुचौ प्रिये यांति जनस्य सेव्यतां॥२॥ सुवासितं हर्म्यतलं मनो
हरं प्रियामुखोच्छ्वासविकंपितं मधु सुतंत्रिगीतं मदनस्य दीपनं शुचौ निशीथेनुभवंति कामिनः॥३॥
नितंबबिंबैः सदुकूलमेखलैः स्तनैः सहाराभरणैः सचंदनैः॥ शिरोरुहैः स्नानकषायवासितैः स्त्रि
यो निदाघं शमयंति कामिनां॥४॥ नितांतलाक्षारसरागलोहितैर्नितंबिनीनां चरणैः सनूपुरैः॥ पदे
पदे हंसरुतानुकारिभिर्जनस्य चित्तं क्रियते समन्मथं॥५॥ पयोधराश्चंदनपंकचर्चितास्तुषारगौरार्पितहारशेख
राः॥ नितंबदेशाश्च सहेममेखलाः प्रकुर्वते कस्य मनो न सोत्सुकं॥६॥ समुद्गतस्वेदचिताङ्गसंधयो विमुच्य वा
सांसि गुरूणि सांप्रतं॥ स्तनेषु तन्वंशुकमुन्नतस्तनाः निवेशयंति प्रमदाः सयौवनाः॥७॥ सचंदनांबुव्यज
नोद्भवानिलैः सहारयष्टिस्तनमंडलार्पणैः॥ सवल्लकीकाकलिगीतनिस्वनैर्विबोध्यते सुप्त इवाद्य मन्मथः॥८॥
प्रसह्य वातोद्धतरेणुमंडला प्रचंडसूर्यातपतापिता मही॥ न शक्यते द्रष्टुमपि प्रवासिभिः प्रियावियोगानलदग्ध

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ब ऋ
२

सितेषु हर्म्येषु निशासु योषितां सुखप्रसुप्तानि मुखानि चंद्रमाः ॥ विलोक्य निर्यंत्रणमुत्सुकश्चिरं निशाक्षये याति ह्रि-
येव पांडुतां ॥ १० ॥ मृगाः प्रचंडातपतापिता भृशं तृषा महत्या परिशुष्कतालवः ॥ वनांतरे तोयमिति प्रधाविता नि-
रीक्ष्य भिन्नांजनसंनिभं नभः ॥ ११ ॥ सविभ्रमैः सस्मितजिह्मवीक्षितैर्विलासवत्यो मनसि प्रवासिनां ॥ अनंग-
संदीपनमाशु कुर्वते यथा प्रदोषाः शशिचारुभूषणाः ॥ १२ ॥ रवेर्मयूखैरभितापितो भृशं विदह्यमानः पथि
तप्तपांसुभिः ॥ अवाङ्मुखो जिह्मगतिः श्वसन्मुहुः फणी मयूरस्य तले निषीदति ॥ १३ ॥ तृषा महत्या हतविक्र-
मोद्यमः श्वसन्मुहुर्दूरविदारिताननः ॥ न हंत्यदूरेपि गजान्मृगाधिपो विलोलजिह्वश्चलिताग्रकेसरः ॥ १४ ॥
विशुष्ककंठाहृतसीकरांभसो गभस्तिभिर्भानुमतोभितापिताः ॥ प्रवृद्धतृष्णोपहता जलार्थिनो जुहंतिनः क्लां-
तशरीरचेतसः ॥ १५ ॥ नभोगिनो घ्नंति समीपवर्तिनं कलापिवक्रेषु निवेशिताननं ॥ सभद्रमुस्तं परिशुष्ककर्द-
मं सरः खनन्नायतपोतमंडलैः ॥ १६ ॥ रवेर्मयूखैरभितापितो भृशं वराहयूथो विशतीव भूतलं ॥ विवस्वता तीक्ष्ण-
तरांशुमालिना सपंकतोयात्सरसोभितापितः ॥ १७ ॥ उत्प्लुत्य भेकस्तृषितस्य भोगिनः फणातपत्रस्य तले निषी-
दति ॥ समुद्धृताशेषमृणालजालकं विपन्नमीनं द्रुतभीतसारसं ॥ १८ ॥ परस्परोत्पीडनसंहतैर्गजैः कृतं सरः सां-
द्रविमर्दकर्दमं ॥ रविप्रभोद्भिन्नशिरोमणिप्रभो विलोलजिह्वाद्वयलीढमारुतः ॥ १९ ॥ विषाग्निसूर्यातपता

CC-0 Dharmartha Trust J&K: An eGangotri-Vaidika Bharata Initiative

पितः फणीनं ... तृषाकुलं ॥ सफेनलालावृतवक्त्रसंपुटं विनिर्गतालोहितजिह्वमुन्मुखं ॥२०॥ तृषाकुलं
निःसृतमद्रिगह्वरादवेक्षमाणं महिषीकुलं जलं ॥२१॥ पटुतरवनदाहाच्छुष्कशष्पप्ररोहाः परुषपवनवेगोत्क्षि-
प्तसंशुष्कपर्णाः ॥ दिनकरपरितापात्क्षीणतोयाः समंताद्विदधति भयमुच्चैर्वीक्ष्यमाणा वनांताः ॥२२॥ श्वसिति
विहगवर्गः शीर्णपर्णद्रुमस्थः कपिकुलमुपयाति क्लांतमद्रेर्निकुंजं ॥ भ्रमति गवययूथः सर्वतस्तोयमिच्छन् शरभ-
कुलमजिह्मं प्रोद्धरत्यंबुकूपात् ॥२३॥ विकचनवकुसुम्भस्वच्छसिंदूरभासा प्रबलपवनवेगोद्भूतवेगेन
तूर्णं ॥ तटविटपलताग्रालिंगनव्याकुलेन दिशि दिशि परिदग्धाः भूमयः पावकेन ॥२४॥ ज्वलति पवनवि-
वृद्धः पर्वतानां दरीषु स्फुटति पटुनिनादैः शुष्कवंशस्थलीषु ॥ प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन ग्लपयति मृगव-
र्गं प्रांतलग्नो दवाग्निः ॥२५॥ बहुतर इव जातः शाल्मलीनां वनेषु स्फुटति कनकगौरः कोटरेषु द्रुमाणां ॥ परिणत-
दलशाखानुत्पतन्प्रांशुवृक्षान् भ्रमति पवनधूतः सर्वतोऽग्निर्वनांते ॥२६॥ गजगवयमृगेन्द्राः वह्निसंतप्त-
देहाः सुहृद इव समेता द्वंद्वभावं विहाय ॥ हुतवहपरिखेदादाशु निर्गत्य कक्षाद्विपुलपुलिनदेशान्निम्न-
गां संविशंति ॥२७॥ कमलवनचिताम्भः पाटलामोदरम्यः सुखसलिलनिषेकः सेव्यचंद्रांशुहारः ॥ व्रजतु त-
व निदाघः कामिनीभिः समेतो निशि सुललितगीते हर्म्यपृष्ठे सुखेन ॥२८॥ इति श्रीकालिदासकृतौ ऋतुसंहारका-

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ष ऋ॰ सशीकरांभोधरमत्तकुंजरस्तडित्पताकोशनिशब्दमर्दलः॥समागतोराजवदुद्धतद्युतिर्घनागमः कामिजनःप्रि
२ यःप्रिये॥१॥नितांतनीलोत्पलपत्रकांतिभिः क्वचित्प्रभिन्नांजनराशिसन्निभैः॥क्वचित्सगर्भप्रमदास्तनप्रभैः
समाचितंव्योमघनैःसमंततः॥२॥तृषाकुलैश्चातकपक्षिणांकुलैःप्रयाचितास्तोयभरावलंबिनः॥प्रयांतिमंदं
बहुधारवर्षिणोवलाहकाःश्रोत्रमनोहरस्वनाः॥३॥वलाहकाश्चाशनिशब्दमर्दलाःसुरेन्द्रचापंदधतस्तडि
द्गुणैः॥सुतीक्ष्णधारापतनोग्रसायकैस्तुदंतिचेतःप्रसभंप्रवासिनां॥४॥प्रभिन्नवैदूर्यनिभैस्तृणांकुरैःसमा
चिताःप्रोत्थितकंदलीदलैः॥विभातिशुक्लेतररत्नभूषितावरांगनेवक्षितिरिंद्रगोपकैः॥५॥सदामनोज्ञं
मदनोत्सवोत्सुकंविकीर्णविस्तीर्णकलापशोभितं॥ससंभ्रमालिंगनचुंबनाकुलंप्रवृत्तनृत्यंकुलमद्यबर्हिणः॥६॥
निपातयंत्यःपरितस्तटद्रुमान्प्रवृद्धवेगैःसलिलैरनिर्मलैः॥स्त्रियःप्रदुष्टाइवजातविभ्रमाःप्रयांतिनद्यस्त्वरि
तंपयोनिधिं॥७॥तृणोत्करैरुद्गतकोमलांकुरैर्विचित्रनीलैर्हरिणीमुखक्षतैः॥वनानिवैंध्यानिहरंतिमानसंवि
भूषितान्युद्गतपल्लवैर्द्रुमैः॥८॥विलोलनेत्रोत्पलशोभिताननैर्मृगैःसमंतादुपजातसाध्वसैः॥समाचितासै
कतिनीवनस्थलीसमुत्सुकत्वंप्रकरोतिचेतसः॥९॥अभीक्ष्णमुच्चैर्ध्वनतापयोमुचाघनांधकारीकृतशर्वरी
ष्वपि॥तडित्प्रभादर्शितमार्गभूमयःप्रयांतिरागादभिसारिकाःस्त्रियः॥१०॥पयोधरैर्भीमगभीरनिःस्वनैस्तडिद्भिरुद्वे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

जितचेतसो भृशं ॥ कृतापराधानपियोषितोप्रियान्परिष्वजंति शयने निरंतरं ॥११॥ विलोचनेंदीवरवारिबिंदुभिर्निषि

क्तबिंबाधरचारुपल्लवाः ॥ निरस्तमाल्याभरणानुलेपनाः स्थिता निराशाः प्रमदाः प्रवासिनां ॥१२॥ विपांडुरं कीटर

जस्तृणान्वितं भुजंगवद्वक्रगतिप्रसर्पितं ॥ ससाध्वसैर्भेककुलैर्निरीक्षितं प्रयाति निम्नाभिमुखं नवोदकं ॥१३॥ वि

पत्रपुष्पां नलिनीं समुत्सुका विहाय भृंगाः श्रुतिहारिनिस्वनाः ॥ पतंति मूढाः शिखिनां प्रनृत्यतां कलापच

क्रेषु नवोत्पलाशया ॥१४॥ वनद्विपानां नववारिदस्वनैर्मदान्वितानां ध्वनतां मुहुर्मुहुः ॥ कपोलदेशा विम

रोमंतेत्यर्थः = नीलमरिताभिः

लोत्पलप्रभाः सभृंगयूथैर्मदवारिभिश्चिताः ॥१५॥ सितोत्पलाभांबुदचुंबितोपलाः समाचिताः प्रस्रवणैः स

पदपतंतोप्रस्रवाताः =

मंततः ॥ प्रवृत्तनृत्यैः शिखिभिः समाकुलाः समुत्सुकत्वं जनयंति भूधराः ॥१६॥ कदंबसर्जार्जुननीपकेतकी

प्रकंपयंस्तत्कुसुमाधिवासितः ॥ ससीकरांभोधरसंगशीतलः समीरणः कंन करोति सोत्सुकं ॥१७॥ शिरोरुहैः

श्रोणितटावलंबिभिः कृतावतंसैः कुसुमैः सुगंधिभिः ॥ स्तनैः सहारैर्वदनैः ससीधुभिः स्त्रियो प्रियेरतिं संजनयंति

कामिनां ॥१८॥ तडिल्लताचक्रधनुर्विभूषिताः पयोधरास्तोयभरावलंबिनः ॥ स्त्रियश्च कांचीमणिकुंडलोज्वलाः

हरंति चेतो युगवत्प्रवासिनां ॥१९॥ मालाः कदंबनवकेसरकेतकीभिरायोजिताः शिरसि बिभ्रति योषितोद्य

कर्णांतरेषु ककुभद्रुममंजरीभिर्यथानुकूलरचितानवतंसकांश्च ॥२०॥ कालागुरुप्रचुरचंदनचर्चितांग्यः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ऋ २

पुष्पावतंससुरभीकृतकेशपाशाः॥ श्रुत्वाध्वनिंजलमुचांत्वरितंप्रदोषेसख्यागृहंगुरुगृहात्प्रविशंतिनार्यः॥२१॥
कुवलयदलनीलैरुन्नतैस्तोयनम्रैर्मृदुपवनविधूतैर्मंदमंदंचलद्भिः॥ अपहृतमिवचेतस्तोयदैःसेन्द्रचापैःप
थिकजनवधूनांतद्वियोगाकुलानां॥२२॥ मुदितमिवकदंबैर्जातपुष्पैःसमंतात्पवनचलितशाखैःशाखिभि
र्नृत्यतीव॥ हसितमिवविधत्तेसूचिभिःकेतकीनांनवसलिलनिषेकाच्छिन्नतापोवनांतः॥२३॥ शिरसिवकु
लमालांमालतीभिःसमेतांकुसुमितनवपुष्पैर्यूथिकाकुड्मलैश्च॥ विकचनवकदंबैःकर्णपूरंवधूनांरच
यतिजलदौघःकांतवत्कालएषः॥२४॥ दधतिचकुचमग्रैरुन्नतैर्हारयष्टिंप्रतनुसितदुकूलैरायतैःश्रोणि
बिंबैः॥ नवजलकणसेकादुद्गतंरोमराजिंललितवलिविभंगैर्मध्यदेशैश्चनार्यः॥२५॥ नवकणजलसं
गाच्छीततामादधानःकुसुमभरनतानांचालकःपादपानां॥ जनितरुचिरगंधिःकेतकीनांरजोभिरपहर
तिनभस्वान्प्रोषितानांमनांसि॥२६॥ जलधिरवनतानामाश्रयोस्माकमुच्चैरयमितिजलसेकैस्तोयदास्तो
यनम्राः॥ अतिशयपरुषाभिर्ग्रीष्मवह्निःशिखाभिःसमुपजनिततापंह्लादयंतीवविंध्यं॥२७॥ बहुगुण
रमणीयःकामिनीचित्तहारीतरुविटपलतानांबांधवोनिर्विकारः॥ जलदसमयएषःप्राणिनांप्राणभूतो
दिशतुतवहितानिप्रायशोवांछितानि॥२८॥ इतिश्रीऋतुसंहारकाव्येवर्षावर्णनंनामद्वितीयसर्गः॥ २ ॥

दधातीतिशेषः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

राम

काशांशुका विकचपद्ममनोज्ञवक्त्रा सोन्मादहंसरवनूपुरनादरम्या ॥ आपक्वशालिरुचिरानतगात्रयष्टिः
प्राप्ता शरन्नववधूरिव रूपरम्या ॥१॥ काशैर्मही शिशिरदीधितिना रजन्यो हंसैर्जलानि सरितां कुमुदैः सरांसि ॥ सप्तच्छदैः
कुसुमभारनतैर्वनांताः शुक्लीकृतान्युपवनानि च मालतीभिः ॥२॥ चंचन्मनोज्ञशफरीरसनाः सजलाः कलापाः पर्यंतसंस्थि
तसितांडजपंक्तिहाराः ॥ नद्यो विशालपुलिनांतनितंबबिंबाः मंदं प्रयांति समदाः प्रमदा इवाद्य ३ व्योम क्वचिद्रजत
शंखमृणालगौरैः त्यक्तांबुभिर्लघुतया शतशः प्रयातैः ॥ संलक्ष्यते पवनवेगचलैः पयोदै राजेव चामरशतैरभिवी
ज्यमानः ॥४॥ भिन्नांजनप्रचयकांति नभो मनोज्ञं बंधूकपुष्परचिताऽरुणिता च भूमिः ॥ वप्राश्च चारुकलमावृतभूमि
[चलितशाखा=]
भागाः प्रोत्कंठयंति न मनो भुवि कस्य यूनः ॥५॥ मंदानिलाकुलितचारुमनोज्ञशाखः पुष्पोद्गमः प्रचयकोमलपल्लवा
ग्रः ॥ मत्तद्विरेफपरिपीतमधुप्रसेकश्चित्तं विदारयति कस्य न कोविदारः ॥६॥ तारागणप्रवरभूषणमुद्वहंती मेघोपरो
धपरिमुक्तशशांकवक्त्रा ॥ ज्योत्स्नादुकूलममलं रजनी दधाना वृद्धिं प्रयात्यनुदिनं प्रमदेव बाला ॥७॥ कारंडवाननवि
[तटः=]
घट्टितवीचिमालाः कादंबसारसकुलाकुलतीरदेशाः ॥ कुर्वंति हंसविरुतैः परितो जनस्य प्रीतिं सरोरुहरजोरुणितास्तटि
न्यः ॥८॥ नेत्रोत्सवो हृदयहारिमरीचिमालः प्रह्लादकः शिशिरशीकरवारिवर्षी ॥ स्त्रीणां मनांसि विकरोति सुधा
मयूखः पत्युर्वियोगविषदग्धशरक्षतानां ॥९॥ आकंपयन्फलभरानतशालिजालान्यानर्तयंस्तरुवरान्कुसुमावनम्रान् ॥
उत्फुल्लपंकजवनां नलिनीं विधुन्वन्यूनां मनश्चलयति प्रसभं नभस्वान् ॥१०॥ सोन्मादहंसमिथुनैरुपशोभितानि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पत्र
८

स्वछानिपुष्पकमलोत्पलभूषितानि ॥ रम्याप्रभातपवनोद्धतवीचिमालान्युत्कंठयंतिसहसाहृदयंसरांसि ॥ ११॥
नष्टंधनुर्वलभिदोजलदोदरेषुसौदामिनीस्फुरतिनाद्यवियत्पताका ॥ धुन्वंतिपक्षपवनैर्ननभोवलाकाः पश्यंतिनोन्नत
मुखागगनंमयूराः ॥१२॥ नृत्यप्रयोगरहिताञ्छिखिनोविहायहंसानुपैतिमधुरस्वनसुप्रगीतान् ॥ मुक्त्वाकदंबकुटजार्जुन
सर्जनीपान्सप्तछदानुपगतान्कुसुमोद्गमश्रीः ॥१३॥ सेफालिकाकुसुमरागमनोहराणिस्वछन्नानिषस्यदकुलैःप्रति
नादितानि ॥ पर्यंतसंस्थितलतावलिशोभितानिप्रोत्कंठयंतिसुवनानिमनांसिपुंसां ॥१४॥ कल्हारपद्मकुमुदा
निमुहुर्विधुन्वन्तत्संगमादधिकशीतलतामुपेतः ॥ मुत्क्राकरोतिपवनोवनितांप्रभातेपत्रांतलग्नतुहिनांबुवि
दह्यमानां ॥१५॥ संपन्नशालिनिचयावृतभूतलानिस्वस्थप्रस्थितप्रचुरगोकुलशोभितानि ॥ हंसैःससारसकुलैःप्र
तिनादितानिसीमांतराणिजनयंतिनृणांप्रमोदं ॥१६॥ हंसैर्जितासुललितागतिरंगनानामंभोरुहैर्विकसि
तैर्मुखचंद्रकांतिः ॥ नीलोत्पलैर्मदकलानिविलोकितानिभ्रूविभ्रमाश्चरुचिरास्तनुभिस्तरंगैः ॥१७॥ श्यामालताः
कुसुमभारनतप्रवालाः स्त्रीणांहरंतिवहुभूषणबाहुकांतिं ॥ दंताहुवांसविशदस्मितचंद्रकांतिंकंकेलिपुष्परचिता
नवमालतीव ॥१८॥ केशान्नितांतघननीलविकुंचिताग्रानापूरयंतिवनितानवमालतीभिः ॥ कर्णेषुचप्रवरकां
चनकुंडलेषुनीलोत्पलानिविविधानिनिवेशयंति ॥१९॥ हारैःसचंदनरसैःस्तनमंडलानिश्रोणीतटंसुवि
मलंरसनाकलापैः ॥ पादांवुजानिकलनूपुरशेखरैश्चनार्यःप्रभिन्नमनसःप्रतिभूषयंति ॥२०॥ स्फुटमकुटचि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ऋतु
८

तानांराजहंसस्थितानांमरकतमणिभासांवारिणांभूषितानां॥श्रियमतिशयरूपांव्योमनीलाशयानांवहतिविगतमेघंचंद्र
तारवकीर्णं॥२१॥शरदिकमलसंगाद्वायवोयांतिशीताविगतजलदवृंदादिग्विभागामनोज्ञाः॥विगतकलुषमम्भःश्यान
पंकाधरित्रीविमलकिरणचंद्रंव्योमताराविचित्रं॥२२॥दिवसकरमयूखैर्बोध्यमानंप्रभातेवरयुवतिमुखाभंपंकजंजृंभ
तेद्य॥कुमुदमपिगतेस्तंलीयतेचंद्रबिंबेहसितमिववधूनांप्रोषितेनप्रियेषु॥२३॥असितनयनलक्ष्मींलक्षयित्वोत्पलेषु
क्वणितकनककांचीमत्तहंसस्वनेषु॥अधररुचिरशोभांबंधुजीवेप्रियाणांपथिकजनइदानींरोदितिभ्रांतचित्तः॥२४॥
स्त्रीणांविहायवदनेषुशशांकलक्ष्मींहंसेविशुद्धवदनेकुमुदाकरश्रीः॥बंधूककांतिरधरेषुमनोहरेषुक्वापिप्रयातिसु
भगाशरदागमश्रीः॥२५॥विकचकमलवक्त्राफुल्लनीलोत्पलाक्षीकुमुदवनविकाशव्याकुलालंविकाशाः॥कु
मुदरुचिरहासाकामिनीवोन्मदीयंप्रतिदिशतुशरद्वश्चेतसःप्रीतिमग्र्यां॥२६॥इतिश्रीषट्ऋतुसंहारकाव्येशरद्वर्णनोना
मतृतीयस्सर्गः॥३॥नवप्रवालोद्गतसस्यरम्यःप्रफुल्ललोध्रःपरिपक्वशालिः विलीनपद्मःप्रविशत्तुषारोहेमंतकालःसमु
पागतःप्रिये॥१॥मनोहरैःकुंकुमपंकरागैस्तुषारकुंदेंदुनिभैश्चहारैः विलासिनीनांस्तनशालिनीनामलंक्रियंतेस्त
नमंडलानि॥२॥नबाहुयुग्मेषुविलासिनीनांप्रयांतिसंगंवलयांगदानि नितंबबिंबेषुनवंदुकूलंतन्वंशुकंपीन
पयोधरेषु॥३॥कांचीगुणैःकांचनरत्नचित्रैर्नोभूषयंतिप्रमदानितंबान् ननूपुरैर्हंसरुतानुकारैःपादांबुजान्यं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ऋ.
५

गात्राणिकालीयकचर्चितानिसपत्रलेखानिमुखांबुजानि ॥ शिरांसिकालागुरुधूपितानिकुर्वंतिनार्यःसुरतोत्स
वानि ॥५॥ गात्राणिकालीयकचर्चितानिसपत्रलेखानिमुखांबुजानि ॥ [illegible] निश्रमक्षामवि[illegible]पांडुवक्त्राःसंप्राप्तहर्षा
भ्युद्येनतरुणयः हसंतिनोच्चैर्दशनाग्रभिन्नान्प्रभिद्यमानानधरानुवीक्ष्य ॥६॥ पीनस्तनोरुस्थलभागशोभामासाद्य
तत्पीडनजातखेदः तृणाग्रलग्नैस्तुहिनैःपतद्भिराक्रंदतीवोषसिशीतकालः ॥७॥ प्रभूतशालिप्रसवैश्चितानिमृगां
गनायूथविभूषितानि मनोहरक्रौंचनिनादितानिसीमांतराण्युत्सुकयंतिचेतः ॥८॥ प्रफुल्लनीलोत्पलशोभितानि
प्रलीनकालोद्भविमर्दितानि प्रशांततोयानिसुशीतलानिसरांसिचेतांसिहरंतिपुंसां ॥९॥ पाकंव्रजंतीहिमशीत
लानैराधूयमानासततंमरुद्भिः ॥ प्रियेप्रियंगुःप्रियविप्रयुक्ताविपांडुतायातिविलासिनीव ॥१०॥ पुष्पासवामोदि
सुगंधिवक्त्रोनिश्वासवातैःसुरभीकृतांगाः परस्परांगव्यतिरिक्तशायीशेतेजनःकामरसानुविद्धः ॥११॥ दंतच्छदैस्स
व्रणादंतचिह्नैःस्तनैश्चपाणिग्रहकृताभिलेखैः संसूच्यतेनिर्दयमंगनानांरतोपभोगोनवयौवनानां ॥१२॥ काचिद्वि
भूषयतिदर्पणसक्तहस्तावालातपेषुवनितावदनारविंदं दंतच्छदंप्रियतमेननिपीतसारंदंतैःप्रभिन्नमपकृष्य
निरीक्षतेव ॥१३॥ अन्याप्रकामसुरतश्रमखिन्नदेहारात्रिप्रजागरविपाटलनेत्रपद्मा ॥ स्कंधप्रदेशालुलितालक
केशपाशानिद्रांप्रयातिमृदुसूर्यकराभितप्ता ॥१४॥ निर्माल्यदामपरिमुक्तमनोज्ञगंधंमूर्ध्नोपनीयघननीलशिरो
रुहांतं पीनोन्नतस्तनभरानतगात्रयष्ट्यःकुर्वंतिकेशरचनामबलास्तरुण्यः ॥१५॥ अन्याप्रियेणपरिभुक्तमवेक्ष्य

5

५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

गात्रंहर्षोन्विता विरचिताधररागशोभाः गुर्वंशुकं परिदधाति नवं नवांगी व्यालंबिनी विलुलितालककुंचिताक्षी ॥१६॥
अन्याश्चिरं सुरतकेलिपरिश्रमेण खेदं गताः सुशिथिलीकृतगात्रयष्ट्याः संधुक्ष्यमाणविपुलोरुपयोधरार्त्ता अभ्यंज
नं विदधति सबलासुशोभाः १७ बहुगुणरमणीयो योषितां चित्तहारी सततमतिमनोज्ञः क्रौंचमालापरीतः ॥ अल्प
ति लघुदिवसः संभोगिनां भोगिदायि प्रदिशतु हिमयुक्तोप्येष कालः सुखं वः ॥१८॥ इति श्रीकालिदासकृतौ ऋतु
संहारकाव्ये हेमंतवर्णनो नाम चतुर्थस्सर्गः ॥४॥ प्ररूढशालीक्षुचयावृतक्षितिं क्वचित्स्थितक्रौंचनिनादशोभितं
प्रकामकामप्रमदाजनप्रियं वरोरु कालं शिशिरागमं शृणु ॥१॥ निरुद्धवातायनमंदिरोदरं हुताशनो भानुमतो ग
भस्तयः ॥ गुरूणि वासांस्यबलाः सयौवनाः प्रयांति काले घजनस्य सेव्यतां ॥२॥ न चंदनं चंद्रमरीचिशीतलं न हर्म्यपृ
ष्ठं शारदिंदुनिर्मलं ॥ न वायवः सांद्रतुषारशीतलाः जनस्य चित्तं रमयंति सांप्रतं ॥३॥ तुषारसंघातनिपातशीतलाः शशां
कभाभिः शिशिरीकृताः पुनः ॥ विपांडुताराणराजालभूषिता जनस्य सेव्या न भवंति रात्रयः ॥४॥ गृहीततांबूलविलेप
नस्रजः सुरासवामोदितवक्त्रसंपुटाः ॥ प्रकामकालागुरुधूपवासिता विशंति शय्यागृहमुत्सुकाः स्त्रियः ॥५॥ कृताप
राधान्बहुशो विवर्जितान्सवेपथून्साध्वसमंदचेतसः ॥ निरीक्ष्य भर्तॄन्सुरताभिलाषिणी स्त्रियोपराधसमदा विस
स्मृताः ॥६॥ प्रकामकामायुधिभिः सनिर्दयं निशासु दीर्घास्वभितापिताश्चिरं ॥ भ्रमंति मंदश्रमखेदतोषिताः द्रपा

ऋ॰ सं॰

ऋ
६
6

मनोज्ञकूर्पासकपीडितस्तनाः सरागकौशेयविभूषितोरसः ॥ निवेशितांतःकुसुमैः शिरोरुहैर्विभूषयंतीव हिमागमं स्त्रियः ॥८॥
पयोधरैः कुंकुमरागचर्चितैः सुखोपसेव्यैर्नवयौवनोष्मभिः ॥ विलासिनीभिः परिपीडितोरसः स्वपंति शीतं परिभूय कामिनः ॥९॥
सुगंधिनिश्वासविकंपितोत्पलं मनोहरं कामरतिप्रबोधनं ॥ निशासु हृष्टाः सह कामिभिः स्त्रियः पिबंति मद्यं मदनीयमुत्तमं ॥१०॥
अपगतमदरागा योषिदेका प्रभाते कृतनिबिडकुचाग्रा पत्युरालिंगनेन ॥ प्रियतमपरिभुक्तं वीक्षमाणा स्वदेहं व्रजति हृदयवासात्
समानाकथापि ॥११॥ अगुरुसुरभिधूपामोदितान्केशपाशान्गलितकुसुममालान्धुन्वती कुंचिताग्रान् ॥ व्रजति गुरुनितंबनि
म्नमध्यावसाना उषसि शयनमन्या कामिनी चारुशोभा ॥१२॥ कनककमलकांतैः सद्य एवांबुधौतैः श्रवणतटनिषिक्तैः पाटला
पांतनेत्रैः ॥ उषसि वदनबिंबैरंससंसक्तकेशैः श्रिय इव गृहमध्ये संस्थिता योषितोद्य (शिशिरकाले) ॥१३॥ पृथुजघनभरार्त्ताः किंचिदानम्र
मध्याः स्तनयुगगुरुखेदान्मंदमंदं व्रजंत्यः ॥ सुरतसमयवेषं नैशमाशु प्रहाय दधति दिवसयोग्यं वेशमेतास्तरुण्यः ॥१४॥ नखप
दचरितागान्वीक्षमाणाः स्तनांतान् अधरकिसलयाग्रं दंतभिन्नं स्पृशंत्यः ॥ अभिमतरसमेतं नंदयंत्यस्तरुण्यः सवितुरुदयका
ले भूषयंत्याननानि ॥१५॥ प्रचुरगुडविकारः स्वादुशाली क्षुरम्यः प्रभूतसुरतकेलिर्जातकंदर्पदर्पः ॥ प्रियजनरहितानां
चित्तसंतापहेतुः शिशिरसमय एषः श्रेयसे वोस्तु नित्यं ॥१६॥ इति श्रीकविकालिदासकृतौ ऋतुसंहारे काव्ये शिशिरवर्णनं
नाम पंचमः सर्गः ॥५॥ प्रफुल्लचूतांकुरतीक्ष्णसायको द्विरेफमालाकृतनम्रगुणः ॥ मनांसि वेद्धुं सुरतप्रसंगिनां वसंतयोधः समुपा
गतः प्रिये ॥१॥ द्रुमाः सपुष्पाः सलिलं सपद्मं स्त्रियः सकामाः पवनः सुगंधिः ॥ सुखप्रदोषा दिवसाश्च रम्याः सर्वं प्रिये चारु

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नरेवसंते॥२॥वापीजलानांमणिमेखलानांशशांकभासांप्रमदाजनानां॥चूतद्रुमाणांकुसुमान्वितानांददातिसौभाग्य
मयंवसंतः॥३॥स्तनेषुहाराःसितचंदनार्द्राःभुजेषुसंगंवलयांगदानि॥प्रयांतिनिःसंगमनंगसौख्यंनितंबिनीनांजघनेषु
कांच्यः॥४॥कुसुंभरागारुणितैर्दुकूलैर्नितंबबिंबानिविलासिनीनां॥रक्तांशुकैःकुंकुमरागगौरैरलंक्रियंतेस्तनमंडलानि॥५॥
कर्णेषुयोग्यंनवकर्णिकारंचलेषुनीलेष्वलकेष्वशोकः॥शिखासुफुल्लानवमल्लिकाश्चप्रयांतिकांतिंप्रमदाजनस्य॥६॥
सपत्रलेखेषुविलासिनीनांवक्त्रेषुहेमांबुरुहोपमेषु॥रत्नांतरेमौक्तिकसंगजातःस्वेदोद्गमःविस्तरतांप्रयाति॥७॥उच्छ्वासयं
त्यःश्लथबंधनानिगात्राणिकंदर्पसमाकुलानि॥समीपवर्त्तिष्वपिकामुकेषुसमुत्सुकाएवभवंतिनार्यः॥८॥तनूनिपांडू
शिथिलानीत्यर्थः ८ निसमंथराणिमुहुर्मुहुर्जृंभणतत्पराणि॥अंगान्यनंगःप्रमदाजनस्यकरोतिलावण्यससंभ्रमाणि॥९॥नेत्रेषुलोलोम
दिरालसेषुगंडेषुपांडुःकठिनःस्तनेषु॥मध्येषुनिम्नोजघनेषुपीनःस्त्रीणामनंगोबहुधास्थितोद्य॥१०॥अंगानिनिद्रा
लसविभ्रमाणिवाक्यानिकिंचिन्मदनालसानि॥भ्रूक्षेपजिह्मानिचवीक्षितानिचकारकामःप्रमदोत्तमानां॥११॥
प्रियंगुकालीयककुंकुमाणिस्तनांगसंगेषुविचर्चितानि॥आलिप्यतेचंदनमंगनाभिर्मदालसाभिर्मृगनाभियुक्तं॥१२॥
गुरूणिवासांसिविहायतूर्णंतनूनिलाक्षारसरंजितानि॥सितानिकालागुरुधूपितानिधत्तेजनःकाममदालसां
गः॥१३॥पुंस्कोकिलश्चूतरसासवेनमत्तःप्रियांचुंबतिरागहृष्टः॥कूजद्द्विरेफोप्ययमंबुजस्थःप्रियंप्रियायाःप्रकरोति चा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ताम्रप्रवालस्तवकावनम्राश्चूतद्रुमाः पुष्पितचारुशाखाः॥ कुर्वंति कामंपवनावधूताः पर्युत्सुकंत्वमनसोंगनानां १७॥ आ
मूलतोविद्रुमरागताम्राः सपल्लवाः पुष्पचयं दधानाः॥ कुर्वंत्यशोका हृदयंसकामं निरीक्ष्यमाणा नवयौवनानां॥१८॥
मत्तद्विरेफपरिचुंबितचारुपुष्पा मंदानिलाकुलितनम्रमृदुप्रवालाः॥ कुर्वंतिकामिमनसः सहसोत्सुकत्वं चूतातिमुक्तक
लिकाः समवेक्ष्यमाणाः॥१९॥ कांतामुखद्युतिमनोहरमुद्गतानां शोभापरां कुरबकद्रुममंजरीणां॥ दृष्ट्वा प्रिये सहृदयस्य
भवेन्नकस्य कंदर्पबाणपतनव्यथितं हि चित्तं॥२०॥ आदीप्तवह्निसदृशैर्मरुतावधूतैः सर्वत्र किंशुकवनैः कुसुमावनम्रैः॥
सद्योवसंतसमयेन समागतेयं रक्तांशुका नववधूरिव भाति भूमिः॥२१॥ किं किंशुकैः शुकमुखच्छविभिर्न दग्धं किं
कर्णिकारकुसुमैर्न कृतं मनो मे॥ यत्कोकिलः पुनरयं मधुरैर्वचोभिर्यूनां मनः सुवदनं निहितं निहंति॥२२॥ पुंस्कोकिलैः
कलवचोभिरुपात्तहर्षैः कूजद्भिरुन्मदकलानि वचांसि धीराः॥ लज्जान्वितं सविनयं हृदयं क्षणेन पर्याकुलं कुलगृ
हेपि कृतं वधूनां॥२३॥ आकंपयन्कुसुमिताः सहकारशाखा विस्तारयन्परभृतस्य वचांसि दिक्षु॥ वायुर्विवाति हृ
दयानि हरन्नराणां नीहारपातविगमः शिशिरो वसंते॥२४॥ कुंदैः सविभ्रमवधूहसितावदातैरुद्योतितान्युपवनानि
मनोहराणि॥ भृंगैः सकोकिलकलैः ध्वनिनादितानि व्यामोहयंति हृदयानि च कामिनीनां॥२५॥ पवनगतिविधू
तं पुष्पितं चूतद्रुमं प्रभिन्नरवममिवीक्ष्य तन्न प्रदेशोपि मार्गे॥ दमयाम धूनियुक्तो नानवेत्ता वसंते मदनशरपरीतो॥ पि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

परभृतकलगीतैर्ह्लादिभिस्सद्वचांसि स्मितदशनमयूखाः कुंदपुष्पप्रभाभिः ॥ करकिसलयकांतिं पल्लवैर्विद्रुमाभिः
रभिभवतु वसंतः कामिनीनामिदानीं ॥ २५ ॥ कनककमलकांतैराननैः पीतनेत्रैः रुचिरनिहितहारैश्चंदनार्द्रैः
स्तनाग्रैः मदजनितविलासैर्लीलसैर्दृष्टिपातैर्मुनिजनमपि नार्यः कामयंति प्रशांतं ॥ २६ ॥ मधुसुरभिमुखा
ब्जं लोचने लोलतारे नवकुरवककुंदैः केशपाशो मनोज्ञः ॥ धृतरसनमनोहे श्रोणिबिंबे वलत्पे वनमवनिकि
मिदानीं योषितां जयप्रचारः ॥ २७ ॥ म्राकेपि नानिहृदयानि मनस्विनीनां वातैः प्रफुल्लसहकारकृताधिवासैः
उत्कंठितैः परभृतस्य मदाकुलस्य श्रोत्रप्रियैर्मधुकरस्य च गीतनादैः ॥ २८ ॥ रम्यप्रदोषसमयः स्फुटचं
द्रभासः पुंस्कोकिलस्य विरुतः पवनः सुगंधिः मत्तालियूथविरुतं निशि सीधुपानं सर्वं हि रसायनमिदं
कुसुमायुधस्य ॥ २९ ॥ छायां जनः समभिकांक्षति पादपानां शीतं तथैव हि जलं किरणं च भानोः ॥ हर्म्ये
चुवनकयोगी नायाः =
श्वयाति चरतिं स्वपु प्रीनलेशकां नामुखो भुंप्सपरहृतिपीनलत्वात् ॥ ३० ॥ इति श्रीकविकालिदा
सकृतौ ऋतुसंहारकाव्ये वसंतवर्णनं नाम षष्ठः सर्गः ॥ ६ ॥ समाप्तमिदं काव्यम् ॥ सं १९.५ जन्मालिखितम् ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ४३८ घ

ऋतुसंहार

कालिदास ८ पत्राणि

वि. सं. १९४२

=८

=८

ऋतुसंहारकाव्य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative